# वृत्रचतुःश्लोकीकारिकाः

vRRitrachatuHshlokIkArikAH

sanskritdocuments.org

June 10, 2018

vRRitrachatuHshlokIkArikAH

# वृत्रचतुःश्लोकीकारिकाः

## Sanskrit Document Information

Text title : vRRitrachatuHshlokIkArikAH

File name : vRRitrachatuHshlokIkArikAH.itx

Category : vishhnu, krishna, puShTimArgIya, chatuHshlokI

Location : doc_vishhnu

Author : viThThaladIkShita

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara, commentary on vRitrachatuHshlokI

Latest update : February 28, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

June 10, 2018

*sanskritdocuments.org*

# वृत्रचतुःश्लोकीकारिकाः

पूर्वमिन्द्रं प्रति प्राह ततो भक्त्याऽग्रतो हरिम् ।
दृष्ट्वा तत्प्रार्थयामास पुष्टिर्दृष्टफला यतः ॥ १॥

आद्ये तु पुष्टिमार्गीयो धर्मः स्मरणकीर्तने ।
सेवा चेति त्रयं तेन प्रार्थितः स निरूप्यते ॥ २॥

आत्मनश्चाधिकारित्वमुत्तमं दीनभावतः ।
प्रार्थनीयतया तस्य साधनं च कृपोच्यते ॥ ३॥ (१)
लौकिको वैदिकश्चार्थस्त्रिविधः प्राकृतैर्गुणैः ।
क्रमेण ते भगवतो गुणैः षड्भिर्निराकृतः ॥ १॥

स्वर्गभूमिरसैश्वर्यं सात्त्विकादि तु लौकिकम् ।
मोक्षश्च पारमेष्ठ्यं च सिद्धयश्चेति वैदिकम् ॥ २॥

प्रवृत्तिधर्मसाध्यत्वात्सामान्यं तत्तु लौकिकम् ।
निवृत्तिधर्मसाध्यत्वाद्विशेषाद्वैदिकं परम् ॥ ३॥

प्रत्येकमेव ते चार्था न तु सम्भूय कुत्रचित् ।
भावयत्यखिलात्मत्वाद्भवन्त्येव तथा हि ते ॥ ४॥

अतोऽर्थो भगवानेव पुष्टिमार्गेऽङ्गमन्यतः ।
सर्वतो नैरपेक्ष्यं च तथाऽत्रापि निरूप्यते ॥ ५॥ (२)
पुष्टिमार्गे हरे रूपदिदृक्षा मनसो हृदि ।
कामो निरूप्यते तत्र दृष्टान्तत्रितयं यथा ॥ १॥

द्वितीयं लौकिकं प्रोक्तमेकं शास्त्रीयमुत्तमम् ।
लौकिकस्त्रिगुणीभूय दृष्टान्तः स्यादलौकिके ॥ २॥

अन्यथैकतरेणापि सिद्धेऽर्थे त्रितयेन किम् ।
क्षुद्रूपो लौकिकः कामो रसरीत्या तु शास्त्रतः ॥ ३॥

प्रभोस्तु रसरूपत्वात् स्वस्यैकत्वेन चोत्तमः ।
अयमेव हि दृष्टान्तस्तेनान्ते चैकतोदितः ॥ ४॥ (३)

इति श्रीविठ्ठलदीक्षितविरचितवृत्रचतुःश्लोकीस्थाद्य-
श्लोकत्रयटीकाकारिकाः समाप्ताः ॥

पुष्टिमार्गे हरेर्दास्यं धर्मोऽर्थो हरिरेव हि ।
कामो हरेर्दिदृक्षैव मोक्षः कृष्णस्य चेद्ध्रुवम् ॥ १॥ (४)
इति श्रीमद्वल्लभाचार्यविरचिता
वृत्रचतुःश्लोकीस्थान्तिमश्लोकटीकाकारिका समाप्ता ।
(एवं वृत्रचतुःश्लोकीटीकास्थाः कारिकाः सन्ति ।
स्वतन्त्रतया श्रीमद्विठ्ठलेश्वरविरचिता वृत्रचतुःश्लोकी
नास्त्येवेति विज्ञेयं स्वमार्गीयग्रन्थविद्भिर्विद्वद्भिः ।)

Commentary on vRRitrachatuHshlokI by viThThaladIkShita

Proofread by PSA Easwaran psaeaswaran at gmail.com

---

*vRRitrachatuHshlokIkArikAH*

pdf was typeset on June 10, 2018

Please send corrections to *sanskrit@cheerful.com*